# একাদশমুখহনুমৎকবচম্

{॥ একাদশমুখহনুমৎকবচম্ ॥}

শ্রীগণেশায নমঃ ।

লোপামুদ্রা উবাচ ।

কুম্ভোদ্ভব দযাসিন্ধো শ্রুতং হনুমতঃ পরম্ ।
যন্ত্রমন্ত্রাদিকং সর্বং ত্বন্মুখোদীরিতং মযা ॥ ১॥

দযাং কুরু মযি প্রাণনাথ বেদিতুমুৎসহে ।
কবচং বাযুপুত্রস্য একাদশমুখাত্মনঃ ॥ ২॥

ইত্যেবং বচনং শ্রুত্বা প্রিযাযাঃ প্রশ্রযান্বিতম্ ।
বক্তুং প্রচক্রমে তত্র লোপামুদ্রাং প্রতি প্রভুঃ ॥ ৩॥

অগস্ত্য উবাচ ।

নমস্কৃত্বা রামদূতাং হনুমন্তং মহামতিম্ ।
ব্রহ্মপ্রোক্তং তু কবচং শৃণু সুন্দরি সাদরম্ ॥ ৪॥

সনন্দনায সুমহচ্চতুরাননভাষিতম্ ।
কবচং কামদং দিব্যং রক্ষঃকুলনিবর্হণম্ ॥ ৫॥

সর্বসম্পৎপ্রদং পুণ্যং মর্ত্যানাং মধুরস্বরে ।

ওঁ অস্য শ্রীকবচস্যৈকাদশবক্ত্রস্য ধীমতঃ ॥ ৬॥

হনুমৎস্তুতিমন্ত্রস্য সনন্দন ঋষিঃ স্মৃতঃ ।
প্রসন্নাত্মা হনূমাংশ্চ দেবতা পরিকীর্তিতা ॥ ৭॥

ছন্দোঽনুষ্টুপ্ সমাখ্যাতং বীজং বাযুসুতস্তথা ।
মুখ্যঃ প্রাণঃ শক্তিরিতি বিনিযোগঃ প্রকীর্তিতঃ ॥ ৮॥

সর্বকামার্থসিদ্ধ্যর্থং জপ এবমুদীরযেত্ ।
ওঁ স্ফ্রেং-বীজং শক্তিধৃক্ পাতু শিরো মে পবনাত্মজঃ ॥ ৯॥

ক্রৌং-বীজাত্মা নযনযোঃ পাতু মাং বানরেশ্বরঃ ।
ক্ষং-বীজরূপঃ কর্ণৌ মে সীতাশোকবিনাশনঃ ॥ ১০॥

গ্লৌং-বীজবাচ্যো নাসাং মে লক্ষ্মণপ্রাণদাযকঃ ।
বং-বীজার্থশ্চ কণ্ঠং মে পাতু চাক্ষযকারকঃ ॥ ১১॥

ঐং-বীজবাচ্যো হৃদযং পাতু মে কপিনাযকঃ ।
বং-বীজকীর্তিতঃ পাতু বাহূ মে চাঞ্জনীসুতঃ ॥ ১২॥

হ্রাং-বীজো রাক্ষসেন্দ্রস্য দর্পহা পাতু চোদরম্ ।
হ্রসৌং-বীজমযো মধ্যং পাতু লঙ্কাবিদাহকঃ ॥ ১৩॥

হ্রীং-বীজধরঃ পাতু গুহ্যং দেবেন্দ্রবন্দিতঃ ।
রং-বীজাত্মা সদা পাতু চোরূ বার্ধিলংঘনঃ ॥ ১৪॥

সুগ্রীবসচিবঃ পাতু জানুনী মে মনোজবঃ ।
পাদৌ পাদতলে পাতু দ্রোণাচলধরো হরিঃ ॥ ১৫॥

আপাদমস্তকং পাতু রামদূতো মহাবলঃ ।
পূর্বে বানরবক্ত্রো মামাগ্নেয্যাং ক্ষত্রিযান্তকৃত্ ॥ ১৬॥

দক্ষিণে নারসিংহস্তু নৈঋর্ত্যাং গণনাযকঃ ।
বারুণ্যাং দিশি মামব্যাৎখগবক্ত্রো হরীশ্বরঃ ॥ ১৭॥

বাযব্যাং ভৈরবমুখঃ কৌবের্যাং পাতু মাং সদা ।
ক্রোডাস্যঃ পাতু মাং নিত্যমৈশান্যাং রুদ্ররূপধৃক্ ॥ ১৮॥

ঊর্ধ্বং হযাননঃ পাতু গুহ্যাধঃ সুমুখস্তথা ।
রামাস্যঃ পাতু সর্বত্র সৌম্যরূপো মহাভুজঃ ॥ ১৯॥

ইত্যেবং রামদূতস্য কবচং যঃ পঠেৎসদা ।
একাদশমুখস্যৈতদ্গোপ্যং বৈ কীর্তিতং মযা ॥ ২০॥

রক্ষোঘ্নং কামদং সৌম্যং সর্বসম্পদ্বিধাযকম্ ।

পুত্রদং ধনদং চোগ্রশত্রুসংঘবিমর্দনম্ ॥ ২১॥

স্বর্গাপবর্গদং দিব্যং চিন্তিতার্থপ্রদং শুভম্ ।

এতৎকবচমজ্ঞাত্বা মন্ত্রসিদ্ধির্ন জায়তে ॥ ২২॥

চত্বারিংশৎসহস্রাণি পঠেচ্ছুদ্ধাত্মকো নরঃ ।

একবারং পঠেন্নিত্যং কবচং সিদ্ধিদং পুমান্ ॥ ২৩॥

দ্বিবারং বা ত্রিবারং বা পঠন্নায়ুষ্যমাপ্নুয়াত্ ।

ক্রমাদেকাদশাদেবমাবর্তনজপাৎসুধীঃ ॥ ২৪॥

বর্ষান্তে দর্শনং সাক্ষাল্লভতে নাত্র সংশয়ঃ ।

যং যং চিন্তয়তে চার্থং তং তং প্রাপ্নোতি পূরুষঃ ॥ ২৫॥

ব্রহ্মোদীরিতমেতদ্ধি তবাগ্রে কথিতং মহত্ ॥ ২৬॥

ইত্যেবমুক্ত্বা বচনং মহর্ষিস্তূষ্ণীং বভূবেন্দুমুখীং নিরীক্ষ্য ।

সংহৃষ্টচিত্তাপি তদা তদীয়পাদৌ ননামাতিমুদা স্বভর্তুঃ ॥ ২৭॥

॥ ইত্যগস্ত্যসারসংহিতায়ামেকাদশমুখহনুমৎকবচং সম্পূর্ণম্ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

and PSA Easwaran psaeaswaran at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Ekadasa Mukha Hanumath Kavacham Lyrics in Bengali PDF
% File name : ekaadashamukha.itx
% Category : kavacha
% Location : doc_hanumaana
% Author : agasti
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : WebD
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : agastya_sa.nhitAyAmekAdashamukha
% Latest update : August 14, 2004, February 5, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website